Acknowledgment

HANSA MEHTA LIBRARY

## आभारप्रदर्शनम्।

अस्य महानिबन्धस्य परिपूर्णतायै येषां गुरुवर्याणां समयो मार्गदर्शनं चाऽहं परमेश्वराशीर्वादरूपेणाऽधिगतवान् तेषां प्रो. डॉ. जयदेव-अरुणोदय-जानीमहोदयानामुपकारस्मरणं करोमि। अहं तेषां चरणकमलेषु मदीयं ज्यौतिषशास्त्रज्ञानं तद्विषयकां दृष्टिं तत्परिणामरूपं फलितज्यौतिषं नवतररूपं च प्राप्तवान्। तेषामुपकारान् कीदृशैः शब्दैः केन च प्रकरेण वर्णयानीति न जाने ।

अस्य महानिबन्धस्य पूर्णतायै महानुभावानां गुरुवर्याणां प्रत्यक्षं सहृदयताधिकता समासादिता ते वडोदरा संस्कृत महाविद्यालयस्य पूर्वप्रधानाचार्याः श्रीमन्तो योगेश-ओझामहोदया धन्यवादानर्हन्ति। सुहृद्वर्याणां गुरुचरणानां डॉ. किशोर-वैद्यमहाभागानामुपकारं संस्मरामि। अस्य शोधमहानिबन्धस्य कार्यकाले वडोदरा संस्कृत महाविद्यालयस्य पुस्तकालयस्य सञ्चालकाः डॉ. ठाकोरलालदवेमहोदया यथावश्यकानि पुस्तकानि प्रदाय यत्सहायं कृतवन्तस्तेषामुपकारान् हृदयेन स्मरामि। महाराजा सयाजिराव विश्वविद्यालयस्य श्रीमती हंसा महेता ग्रन्थालयस्य कर्मचारिणः समये समये पुस्तकानि प्रदाय स्वकीयं सौहार्दं सेवाप्रीतिं च प्रदर्शितवन्तस्तदर्थं तेषामुपकारस्मरणं करोमि।

अन्ते च महाराजाविश्वविद्यालयस्य प्राच्यविद्यामन्दिरस्य कार्यकारिनियामकाः प्रो. डॉ. मुकुन्द-लालजी-वाडेकरमहोदयानां चरणकमलेषु प्रणतयः। प्राच्यविद्यामन्दिरस्य सर्वेऽपि कर्मचारिणो विशेषतश्च पुस्तकालयाधिकारी श्रीमान् दिगम्बर-काशीकरमहोदयोऽपि यथावश्यकानि पुस्तकानि प्रदर्शितवान ततस्तस्मै धन्यवादान् व्याहरामि। इति शम्।

वटपत्तनम्।
दिनाङ्कः २७/०९/२०१२

जोशीकुलोत्पन्नःप्रवीणकान्तात्मजः सञ्जयशर्मा।

Acknowledgment

MEHTA LIBRARY

## ।।पुरोवाक्।।

श्रीमद्भगवते हाटकेश्वरमहारुद्राय नमः।
गोत्रप्रवर्तकाय श्रीभरद्वाजाय नमः।
त्रिवेदीकुलोत्पन्नाय श्रीमते जगन्ननाथाय तत्पुत्राय श्रीमते माधवलालाय
तत्पुत्राय श्रीमते कनैयालालाय तत्पुत्रायाऽस्मत् पितृचरणाय श्रीमते प्रवीणकान्ताय
वात्सल्यमूर्तये च जनन्यै अवन्तिकायै नमो नमः।

श्रीसयाजिरावनृपतेः कृपाभाजां श्रीमतां ज्यौतिषशास्त्रपारङ्गतानां पण्डिताग्रणीनां श्रीमतां कनैयालालमहानुभावानां चरणकमलयोः सादरं सप्रणामं भक्तिपूर्णं हृदयं प्रकटयतो ममाऽन्तःकरणं भूरिभूरि हर्षमनुभवति। तत्कारणमपि स्पष्टीकरोमि। ज्यौतिषशास्त्रविदुषामग्रगण्यस्य श्रीमतः कनैयालालस्य पौत्रतया मयाऽपि ज्यौतिषशास्त्रविषयकमध्ययनं करणीयमिति बाल्यकालादेव संकल्पाः पुष्टिं याताः।

वडोदरासंस्कृतमहाविद्यालये गुरुचरणानां डॉ. निरंजन–शुक्लमहोदयानां श्रीचन्द्रकान्त–जोशी–महोदयानां च चरणकमलेषु ज्यौतिषशास्त्राचार्यस्य २००३ तमे वर्षे परीक्षामुत्तीर्य मया २००५ तमे वर्षे तत्रैवाऽध्यापनकार्यमपि कर्तुं लाभोऽपि श्रीहाटकेश्वरकृपया समासादितः।

एकदा प्रधानाचार्याणां श्रीमतां योगेश–ओझामहोदयानां सांनिध्ये सर्वेऽध्यापकाःसमुपविष्टा आसन्। तदा विनयनसंकायस्य संस्कृत–पाली–प्राकृतविभागे प्रोफेसरपदमलङ्कुर्वाणाः श्रीमन्तः स्व० डॉ. लाभशंकर(ललित)जोशीमहोदयाः समुपागताः। तैः सह चर्चायां ज्यौतिषशास्त्रविषयमाश्रित्य मया वाचस्पत्यं पारयितव्यमिति प्रो.जोशीमहोदयैः प्रेरितोऽहं निर्णयं कृतवान् । किन्तु षण्मासाभ्यन्तर एव तेषामाकस्मिकं निधनं जातम्। तत्पश्चात् किंकर्तव्यमूढोऽहं पुनरेकदा प्रधानाचार्याणां समीपे प्रो. डॉ. राजेन्द्र–नाणावटीमहोदयान् दृष्टवान्। तैरेव सपदि प्रोक्तम् " अल्या भाई! प्रो. जयदेव पासे जाने ? (अरे मित्र! प्रो. डॉ. जयदेवं पश्य।) इति बोधितोऽहं गुरुवर्येण श्रीमता डॉ. किशोरवैद्य–महोदयेन सह संस्कृत–पाली–प्राकृतविभागस्य तत्कालिकाध्यक्षान् प्रो. डॉ. श्री जयदेव-अरुणोदय-जानीमहानुभावान् द्रष्टुं गतवान्। तदा प्रो. डॉ. जानीमहोदयानां सकाशे केवलमेकं स्थानं रिक्तमासीदतोऽहं "समयो नास्ति। कार्यबाहुल्यमस्ति ।" इत्युक्त्वाऽऽगामिनि वर्षे पुनरागन्तुं कथितः। संस्कृतमहाविद्यालयं प्रतिनिवृत्य प्रधानाचार्याणां समीपे प्रो. डॉ. नाणावटीमहोदयान् दृष्टवान् । तैर्ममाऽनुभवः श्रुतः। तत्कालमेव प्रो. डॉ. नाणावटीमहोदयैर्दूरभाषेण प्रो. डॉ. जयदेवजानिना सह वार्तालापःकृतोऽहं च पुनः संस्कृत–पाली–प्राकृत विभागे प्रेषितः। डॉ. किशोर वैद्येन सह अहं प्रो. डॉ. जयदेव-जानीमहोदयान् दृष्टवान् । प्रो. डॉ. जयदेव-जानीमहोदयैः कथितं "कार्यराम्भं कुर्वः। किन्तु पञ्जीकरण(Registration)मन्तरं करिष्याव" इति।

वाचस्पत्यस्य शीर्षकं निश्चितम् । कार्यमारब्धम्। शनैःशनैरपि नियतरूपेण प्रो. डॉ. जयदेव–जानीमहोदयैः समारब्धः। सम्पर्को दृढस्तदनु सुदृढश्च जातः। नियमितरूपेणाऽहं यां यां सामग्रीं (Data) प्राप्तवान् तां तां गृहीत्वा मार्गदर्शकमहोदयैः सह चर्चादिकं कृतवान् । प्रथमत एव प्रो. डॉ. जयदेव–जानीमहोदयाः सर्वेभ्यो वाचस्पत्य(Ph.D.)छात्रेभ्यः संशोधनस्य रूपरेखां ददाति स्पष्टं च बोधयान्ति । तदनुसारमहं कुत्रापि काञ्चिदपि समस्यां कञ्चिदपि विलम्बं वा नैव दृष्टवान् । एता–वत्कालपर्यन्तं समयः क्व गतः कथं च कार्यं समाप्तिमगमत् तन्मया विना भारं पारितम् । लीलयैव कार्यभारस्य हिमालयो लङ्घितो मया । अतो मम हृदयमतीव धन्यतामनुभवति।

वाचस्पत्यस्य शीर्षकं 'जन्मकुण्डल्यां कुटुम्ब–सुत–कलत्रभावत्रिवम् – एकमध्ययनम्'। तदनुसृत्य पं.शङ्कर–बालकृष्ण–दीक्षितचरणानां ज्यौतिषशास्त्रेतिहास(हिन्दी)ग्रन्थस्य सघनपठनं कृत्वा प्रथमदृष्ट्या विषयो वर्णितः । तदनु कुटुम्बभावस्य, सुतभावस्य कलत्रभावस्य च ज्यौतिषशास्त्रानुसारं सामान्यः परिचय एकत्रीकृतः। तदनन्तरमेतद्भावत्रिकस्य विशेषपरिचयोऽपि साधितः। एतस्मि–न्नध्ययनकाले ज्यौतिषशास्त्र पठिताः कतिचित् होरा–नवमांश–द्रेष्काण–पारिजातादिविषया अप्यत्र महानिबन्धेऽत्यावश्यका इति विचार्य सर्वेऽपि परिशिष्टेषु संदृब्धाः सन्ति । आधुनिके कलिमलग्रस्ते दुःखपूर्णे समस्यासमन्विते चिन्ताविषादादिदुर्भावमथिते च युगे सामाजिकानां मनुष्याणां सुत–सम्बधिन्यः कुटुम्बसम्बधिन्यः कलत्रसम्बधिन्यश्च चिन्ताः समधिका दृश्यन्ते। अत एवैतस्य महानिबन्धस्य संशोधनफलं परिणामश्च समाजे समुपयोगितामवश्यं धारयन्तीति मम विनम्रः प्रयासः। सर्वेषां ज्योतिर्विदां ज्यौतिषशास्त्ररसिकानां चाऽपेक्षापूर्तिं विधास्यत इति शम्।

अस्य महानिबन्धस्य पूर्णतायै येषां येषां महानुभावानां गुरुवर्याणां सहकार्यकराणां सुहृदाञ्च प्रत्यक्षं परोक्षं वा सहृदयताधिकता तेषां धन्यवादान् व्याहरन् प्रथमं वडोदरासंस्कृतमहाविद्यालयस्य पूर्व-प्रधानाचार्याः श्रीमन्तो योगेश–ओझामहोदया हृदयगतान् धन्यवादानर्हन्ति। अस्य महानिबन्धस्य 'अङ्गुलिनिर्देशेन पुण्यं लब्धवतां प्रो. डॉ. राजेन्द्र-नाणावटीमहोदयानामपि स्नेहभावं प्रकटीकरोमि। सुहृद्वर्याणां गुरुचरणानां डॉ. किशोर–वैद्यमहाभागानामनेकशो यदा कदापि संशोधने आवश्यकता जाता तदा तदा मां सस्नेहं सवात्सल्यं च स्वागतं व्याहरताम् एतेषामुपकारं कथयितुं मदीया जिह्वा विरामं प्राप्तुं न शक्नोति। सुहृद्यवर्यः श्रीमान् मुकेशत्रिवेदी श्रीमान् दीपकयाज्ञिकः श्रीमती पौलोमीदवे च धन्यवादानर्हन्ति।

अस्य महानिबन्धस्य गणकयन्त्रे लिपिबद्धां प्रतिं कर्तुं स्वसमयं ददतौ डॉ. महेश–पटेलः श्रीमान् पीयूष–शाहश्च यत्साहाय्यं कृतवन्तौ तयोरुपकारान् न विस्मरामि।

मदीयगुरुचरणा वेदशास्त्रसंपन्नाः स्व. पण्डितश्रीनरहरि–ओझा पण्डितश्रीलक्ष्मीशङ्कर–शुक्लः श्रीमदनलाल–ओझा श्रीरमणलाल–पुराणीमहानुभावा विद्यमानाश्च प्रो. डॉ.जयन्तीलाल–भट्टः श्रीमफतलाल–व्यासः श्रीकान्तिलाल–याज्ञिकमहोदयाः प्राथम्येन प्रणामानर्हन्ति ।

अन्ते च मम पितृचरणा: श्रीमन्त: प्रवीणकान्तमहोदया: स्ववात्सल्येन मां प्रेरितवन्त:। मदीया भ्रातरो योगेशस्तत्पत्नी रेखाभाभी राजीवो गौरांगश्च भगिन्यौ अनिला रागिणी चेति सर्वे सौहार्देन मां प्रेरितवन्त: । अतस्तेषामपि साधुवादान् प्रकटीकरोमि।

वटपत्तनम्।

जोशीकुलोत्पन्न:प्रवीणकान्तात्मज: सञ्जय शर्मा।

दिनाङ्क: २७ /०९/२०१२